This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क M2429 विषय .....

नाव श्री दिनकरी

लेखक/लिपीकार .....

पृठ 40 काळ ..... पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2429

श्रीहयवदनराजायनमः॥ लक्ष्मीपादयुगंप्रणम्यपितरंश्रीबालकृष्णाभिधंभारद्वाजकुलांबुधौविधुमिवश्रीगोरवास्यांबुजात्॥ जात्वानेषुमत
मितेनवचसासिद्धांतमुक्तावलीमुद्दार्थैस्तनुतेयथामतिमहादेवःपरेषांकृते॥१॥ वृद्ध॥ भाषापरिच्छेदव्याख्यानंचिकीर्षुःश्रीविश्वनाथसिद्धांतपंच
ननोनिर्विघ्नपरिसमाप्तिसिद्धयेकृतस्येश्वरनिर्देशरूपमंगलस्यत्रिषाअप्यवंवयुरितित्रिषत्रिक्षायेनिबध्नातिईश्वरंप्रार्थयते॥चूडामणीकृतेति
लीलेति॥ इदंचविशेष्यं॥ नातस्समाप्तपुनरुक्तत्वंदोषः॥ वस्तुतस्तुविधोःकिमितिचूडामणीकरणंकिमर्थंवासुकेवलयीकरणंइत्याकांक्षार्थंनि
कांक्षाप्रतिभूवतीतिलीलेत्यादिविशेषणानुक्तौविवक्षितान्वयबोधाभावान्नायमत्रदोषः॥ उक्तयाप्याकांक्षयाविशेषणान्वयएवतत्प्रसरादिति
लयातांडवंनृत्यंतत्रपंडितोभिनेत्यर्थः॥ अनेनचनृत्यविशेषतयास्मरणविषयात्प्रार्थिताःअथाभवंयेवेतिसूचितं॥ ननुभूषणरहि
थंनृत्यंतत्राह॥ चूडामणीकृतेति॥ अचूडामणिःचूडामणिःसंपद्यतेतिचूडामणिकृतः॥ चूडामणिकृतःविधुःयेनसः॥ तथावलयीकृतेति
अवलयंवलयंतेनसंपद्यतेतिवलयीकृतः॥ वलयीकृतःवासुकीयेनसः॥ तथा॥१॥ त्रिषावधानायप्रतिजानीते॥ निजनिर्मितेति॥ निजो
र्मितारचितायाकारिकावलीं॥ अतिअत्यंतंसंक्षेपःसंक्षेपोयासुःउक्तयःवचांसिवचःप्रतिपाद्याःयुक्तयस्ताभिःकृत्वा॥ अ
दीकरवाणी॥ प्रकटीकरोमि॥ ननुलीलावत्यादिप्राचीननिबंधाध्ययनेनैवकारिकावलीप्रतिपादितार्थबोधइतिकिमनेनभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाद्ग्रंथबाहुल्येनेत्यतउक्तं अतिसंक्षिप्तेति॥तथाचलीलावत्यादिप्राचीननिबंधेषुग्रंथबाहुल्येनबहुतरदुःखहेतुप्रतिपत्तुकृतयानबालस्तो
त्तिरितिभावः॥यथोत्क्षामलुकतापुत्तुकानादरणीयतानिरस्मितुंचिरंतनेत्युक्तं॥नन्वितिभवधारणं॥तथाचकुतुकादेवेत्यर्थः॥एतेन
थकरणेकुतोभावःसूचितः॥स्वस्यग्रंथकरणप्रवृत्तौनिमित्तमाह॥राजीवेति॥राजीवेयासादयावत्तावदस्तदधीनइत्यर्थः॥ननुग्रंथादौश्रो
तयेप्रयोजनादिवक्तव्यंभवति॥तस्यचेहानुक्तत्वात्उपेक्षणीयताग्रंथस्यादेतद्ग्रंथस्यस्यादित्याशंक्यविषयप्रयोजनसंबंधाधिकारिण
यन्नभातिसंक्षिप्यत्वादेतद्ग्रंथस्यसकलपदार्थप्रतिपादकतयाकथंबालयुत्पत्तिरित्याशंकाचेतद्ग्रंथस्यसकलपदार्थप्रतिपादकत्वद
परितरन्यत्करोषियदक्षासियज्जुह्वोषिददासियत्॥यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिभगवद्गुक्तमुक्तावलीसमंस्वकीयंग्र
भगवतिचार्पयन्स्वकीर्त्यनुवृत्तयेग्रंथस्यस्वस्यचनामनिबध्नाति॥सद्रव्येति॥द्रव्यैःसहितायुक्ता॥प्रतिपादकतया॥गुणैरपिगुंजि
युक्ता॥सत्तामुत्क्षेपणादीनांपंचानांकर्मणांज्ञापिकाबोधिका॥सत्जातिरूपंसामान्यं॥विशेषाःनित्यःसमवायस्तैर्मिलिता॥य
तिसामान्यविशेषनित्यमिलितानित्यस्य॥यैस्यनित्यमिलितंनित्यसंबंधः॥अभावप्रकर्षःप्रागभावादिभेदेनवेलक्षण्यंतस्याज्ञ
प्रकाशिका॥एषाबुद्धिस्थासिद्धांतमुक्तावली॥सिद्धांतएवमुक्तास्तासांआवलिःपंक्तिः॥विष्णोर्नारायणस्यवक्षसिवक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनक०
३

अविगीततत्वेचबलवदनिष्टानुबंधित्व।।तेनत्रयेनादौप्रवृत्युपयुक्तबलवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावेपिनत्रयशिचारः।।सिद्धे।अ
ते।।तत्रामंगलेऽफलजिज्ञासायांविशेषतःफलजिज्ञासायां।।ननुतद्दिनार्थंगंगास्नानादेर्नामदृष्टार्थकत्वेत्यतःसंभवतीति।।तथाचतत्रदृष्ट
वेनादृष्टकल्पनेतिभावः।।ननुतथापिविघ्नध्वंसात्स्वर्गएवेष्टकल्पतोमतआह।।उपस्थितत्वादिति।।आरब्धंकर्मनेनिर्विघ्नंपरिसम
मितिग्रंथादौप्रवृत्तपुरुषकामनाविषयत्वेनपरिशेषानुमानेप्रवृत्तमानस्योपस्थितत्वादित्यर्थःकल्पते।।अनुमीयते।।अनेनत्र
लस्यसमाप्तिहेतुत्वेअनुमानमेवप्रमाणं।।ननुत्रिशचारानुमिताश्रुतिः।।इदानींआनुपूर्वीविशेषनिर्णायाभावेनतस्याबोधकत्वा
सूचितं।।व्यापकत्वघटितकारणताग्रहप्रतिबंधकज्ञानविषयव्यतिरेकव्यभिचारमुद्भरति।।इथंचेति।।मंगलस्यसमाप्तिफलकत्वे
तत्रापिनास्तिकादिग्रंथेपि।।तत्रमंगलंकल्प्यते।।अनुमीयते।।कार्यरूपसमाप्त्यनिशेषः।।आत्मसंदेहपर्यवसन्नस्यपदस्यो
रसंत्रायस्यकारणतानुमितौअप्रतिबंधकत्वाद्व्यभिचारनिर्णयस्यचोभावादितिभावः।।नचैवमप्यन्वयव्यभिचारज्ञानंकथं
हविशेषविषयस्यैवस्यात्रोक्तानयव्यभिचारंनिरस्यति।।यत्चेति।।तत्रकादंबर्यादौ।।बलवत्तरत्वंवेज्ञात्यं।।नचैवमपिकथं
होकुतोनविघ्नध्वंसइत्यतआह।।प्रचुरस्येति।।प्रचुरस्यैवमंगलस्यार्थः।।बलवत्तरविघ्ननिवारणे।बलवत्तरादिविघ्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनप्रचुरविघ्नस्यापिपरिग्रहः॥ ननुतथापिकादंबर्यादौविघ्नध्वंसोमाजायतांसमाप्तिःपंजायतांमंगलरूपहेतो
दित्याशंक्याह॥ विघ्नध्वंसस्त्विति॥ तथाचस्वजन्यविघ्नध्वंससंबंधेनमंगलाभावान्नसमाप्तिरितिभावः॥ आहरित्यस्वरसोद्भावनं॥ तद्ध
विघ्नध्वंसद्वारामंगलस्यहेतुत्वंनसंभवति॥ नास्तिकग्रंथसमाप्तौव्यभिचारात्॥ नचस्वजन्यविघ्नध्वंसोयत्यवच्छेदकतासंबंधेनसमाप्तिं
जन्यविघ्नध्वंसावच्छेदकतासंबंधेनमंगलस्यहेतुत्वात्स्वप्रतियोगिचरमक्षणानुकूलक्षतिमत्त्वसंबंधेनसमाप्तिंप्रतिस्वाश्रयतासंबंध
लस्यहेतुत्वाज्जन्मांतरमंगलकल्पनयानव्यभिचारइतिवाच्यं॥ तथा॥ सतिजन्मांतरीयसमाप्तिमुद्दिश्यजन्मांतरेमंगलकरणापत्तेः॥
स्वप्रतियोगिचरमक्षणावच्छेदकतासंबंधेनसमाप्तिंप्रतिस्वोत्पत्त्यवच्छेदकजातीयतासंबंधेनमंगलहेतुत्वस्यवाच्यतयानास्तिकत्वारोपस्य
चारस्यदुर्वारत्वात्॥ नचपुत्रकामाधिकरणविरोधः॥ सहकार्यंतरसमवधानेनऐहिकपुत्राभावेनामुष्मिकपुत्रत्वरूपफलस्यतत्रसिद्धांतितत्व
तिवाच्यं॥ तत्रपुत्रमात्रकामनात्रवणादिहेतुविनिर्मुक्तनिरवच्छिन्नाचारालंबितश्रुत्यातादृशसमाप्त्यवच्छेदकमंगलफलकत्वात्॥ नचस्वावच्छेदक
नप्रतियोगिकत्वंस्वाश्रयवृत्तिनोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेनमंगलजन्यविघ्नध्वंसविनिर्मुक्तसमाप्तिस्तेस्यमंगलकार्यतावच्छेदकत्वा
व्यभिचारइतिवाच्यं॥ कारणस्यकार्यतावच्छेदकत्वानुपगमात्॥ अतएवकाम्यमरणान्मुक्तिरितिश्रुत्यनुगतपंचम्याःप्रयोजकत्व
वर्णसंग्रहेणसंगच्छते॥ अन्यथातत्रापिकाम्यमरणविनिर्मुक्तिंप्रतिकाम्यमरणहेतुत्वस्यनिर्दुष्टतयातथोपपत्तौनमसंगतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथतमेवंविदित्वाअतिमृत्युमेतिनान्यःपंथाअयनायविद्यतेइतिश्रुत्यातत्त्वज्ञानस्यमुक्तिसामान्यंप्रतिहेतुत्वंप्रतिपादितं।तच्चकाम्यनि
रणस्यमुक्तिहेतुत्वेनसंभवति।काम्यनिमरणजन्यमुक्तौतत्त्वज्ञानस्यव्यभिचारात्।अतःकाम्यनिमरणस्यनमुक्तिजनकत्वं।अपितु
ज्ञानजननद्वारामुक्तिप्रयोजकत्वमेवेतिग्रंथकृतांतत्रत्यपंचम्याःप्रयोजकत्वेपरत्वोपवर्णनं।।ननुकारणस्यकारणातानवच्छेदकत्वान्न
वर्णनमितिचेत्।।अस्तुकारणस्यकार्यतावच्छेदकत्वंअस्तुपूर्वोक्तरीत्यामंगलजन्यविघ्नध्वंसनिवृत्तिरूपसमाप्तित्वस्यकार्यतावच्छे
त्वेननास्तिकाम्यनिमरणेव्यभिचारवारणं।।एवमपिभोगादिनात्रविघ्नध्वंसपर्यवसन्नसमाप्तेरुक्त्यानियतपूर्ववर्तिताकेनध्वंसेनेवमंगलस्य
यसमाप्त्युपपत्तेर्मंगलस्यान्यथासिद्धत्वंदुर्वारमेव।।नचव्यापारेणव्यापारिणोनान्यथासिद्धिरितिवाच्यं।।यत्रप्रमाणबोधितेव्या
कारणतानिर्वाहायव्यापारस्यकारणत्वंकल्पनेयथायागस्यस्वर्गहेतुतानिर्वाहार्थमपूर्वं।।तत्रैवव्यापारेणव्यापारिणोना
सिद्धिः।।अतएवकाम्यनिमरणस्यतत्त्वज्ञानेनमुक्तावन्यथासिद्धत्वात्प्रयोजकपरतयाश्रुतिसमर्थनंसंगच्छते।।पुनश्चप्रतिबं
भावस्यकार्यमात्रेहेतुतायांमंगलकारणतांविनापिकृप्तयामंगलस्यान्यथासिद्धत्वंदुष्परिहरमेवेति।।विघ्नध्वंसस्यद्व
मिच्छतांप्राचांमतेपिविघ्नध्वंसस्यकार्यत्वावश्यकतयाविघ्ननिवर्तनामितिमंगलाचरणंचविघ्नध्वंसएवफलमितिवदतां
मणिकृतमतमाह।।नयास्थितिः।।विघ्नध्वंसएवेत्येवकारेणसमाप्तिंव्यवच्छेदः।।फलंप्रत्युद्देश्यं।।ननुसमाप्तिस्तद्धि

कामनया २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मकोत्यादित्यत आह॥ समाप्तिस्थिति॥ बुद्धिज्ञानं॥ प्रतिभातद्वितोषः॥ स्मृत्योरत्यः॥ प्रतिभादित्यादिना विघ्नसंसर्गाभावपरिग्रहः॥ अनयेवरीत्यादि
रीस्वरूपेण्यवग्रहनिवृत्तिरेवफलं॥ वृष्टिस्तुस्वकारणादेवेतिध्येयं॥ एवंमंगलस्यविघ्नध्वंसप्रतिजनकत्वे॥ स्वतःसिद्धविघ्नविरहवतेति॥ विघ्नात्यन्त
वत्ता॥ ननुनिष्फलेप्रवृत्तिरेवकथमतआह॥ विघ्नशंकयेति॥ संशयनिश्चयसाधारणविघ्नज्ञानमेवप्रवृत्तकमितिभावः॥ तदाचरणात्॥ मंगलाचरणेन
ननुविघ्नसंशयेमंगलाचरणमेवास्तिक्यं॥ इत्यतआह॥ तथेवेति॥ त्रीणिचारादिति॥ विषयतासंबंधेनमंगलइतिशेषः॥ ननुनिर्विघ्नपुरुषानुष्ठितमंगलेन
अन्वयव्यभिचारेणविघ्नध्वंसंप्रतिमंगलस्यकारणताबाधिता॥ तथाचबाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यमितिश्रुतिः॥ कारणताबोधकत्वमंशेकि
कोनिरस्यति॥ नचेति॥ तस्यनिर्विघ्नपुरुषानुष्ठितमंगलस्य॥ तद्बोधकेति॥ मंगलस्यविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः॥ स्यादिविघ्नइति
शेषादित्यतस्तत्रेतिप्रतियोगिरूपकारणाभावेनु विघ्नध्वंसस्यकार्योनुदयेपत्तौकारणतायाःबाधितत्वेननकारणताबोधकवेदाप्रामाण्यमितिभ
अतएवनात्रोप्रतियोगिनःकारणत्वादेवतद्बोधकवेदाप्रामाण्यमिति॥ प्रायश्चित्तस्यपापनाशकत्वबोधकेवेदाप्रामाण्यमित्यर्थः॥ ननुमंगलेनविघ्न
ध्वंसेकारणं॥ विनायकस्तवपाठादिजन्यविघ्नध्वंसेव्यभिचारात्॥ विनायकस्तवस्यमंगलत्वेपितदनुकूलकर्मविघातस्वरूपस्यतत्पाठस्यत
ल्लक्षणाभावात्॥ नचपाठकर्तासंबंधेनविनायकस्तवएवविघ्ननाशकःस्वमंगलमेवेतिन्यभिचारइतिवाच्यं॥ सर्वेविघ्नाःनश्यंतीत्यादिना
त्पाठस्यापिविघ्ननाशकत्वबोधनात्प्रायश्चित्तजन्यविघ्नध्वंसेव्यभिचारादित्यतआह॥ मंगलंचेति॥ स्तवपाठादिरित्यादिनाप्रायश्चितादिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यह॥तथाचमंगलस्यस्वव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेनमंगलत्वेनिमित्तेविघ्नध्वंसत्वेविजातीयविघ्नध्वंसत्वंवा॥कार्यतावच्छेदकं॥एवंविनायकस्तवप
ठादेरुपदर्शितसंबंधेनविनायकस्तवपाठादिनिमित्तेविघ्नध्वंसत्वंविजातीयविघ्नध्वंसत्वंवा कार्यतावच्छेदकमितिनव्याश्चारइतिभावः॥न
विघ्नध्वंसएवयदिमंगलस्यफलंतदासमाप्तिकामस्यमंगलेप्रवृत्तिर्नस्यादतःसमाप्तिसाधनत्वान्मंगलस्यस्वर्गेप्रवृत्तिर
तच्चनसंभवति॥स्वतःसिध्यविरहस्वर्गेयपिचोरेणविघ्नध्वंसस्यसमाप्तिसाधनत्वाभावादित्याशंक्यनिरस्यति॥क्वचिदिति॥प्रतिबंधकेति॥
संसर्गाभावस्य॥संसर्गाभावत्वेनसंसर्गाभावस्य॥तथाचविघ्नसंसर्गाभावत्वेनहेतुत्वान्नपूर्वोक्तव्यभिचारइतिवाच्यं॥तत्रचततद्विघ्नाभावत्वेनहेतुत
विघ्नाभावकूटत्वेनविघ्नप्रागभावादिनामेकत्रासंभवेनसमाप्तिर्नस्यादितिबोध्यं॥यत्रचमंगलंविनापिसमाप्तिस्तत्रविघ्नध्वंसाभावत्वंसमाप्ते
नातूयतिरेकव्यभिचारमात्रंक्वनिषेधति॥इत्थंचेति॥दुरितध्वंसकल्पनेतज्ज्ञानकीर्तनमंगलकल्पनेचोपरतादाह॥स्वतःसिद्धेति॥यत्रचम
यपिनसमाप्तिस्तत्रमंगलाद्विघ्नध्वंसोभवत्येवसमाप्यभावस्तुविघ्नभूयस्त्वात्ततत्तन्मंगलानांनरोद्यन्त्रविघ्नाद्धेत्वबोधेयं॥अथसमाप्तिविघ्न
योरेकात्मनिष्ठयोःकथंकार्यकारणभावइतिचेदुच्यते॥स्वप्रतियोगिप्रयोजकत्वसंबंधेनचरमवर्णध्वंसरूपसमाप्तिप्रतिविशेषणतासंबंधे
नासंसर्गाभावत्वेनहेतुत्वमिति॥वस्तुतस्तुआहत्यनेनसूचितं॥अन्यथासिद्धिंप्रकटयति॥क्वचिच्चेति॥विघ्नाभावत्वंचाभावत्वेवक्ष्यति॥विघ्नध्वंस
द्वारकमंगलस्यचचरमवर्णध्वंसःसमाप्तिसाधनं॥समाप्तिसाधनं॥समाप्त्यव्यवहितपूर्ववर्तितयानिश्चितः॥तथाचतेनेवमंगलस्वर्गेतीयसमाप्तिनिर्वाहेमंगलस्यत
विघ्नध्वंसस्यचान्यथासिद्धिः॥ध्वंसप्रागभावयोरत्यंताभावेनविरोधेसामानाधिकरण्यात्॥ध्वंसस्वर्गेपिअत्यंताभावसत्वादितिसाधकः॥न न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यभिचारकरणोविध्वंसस्यकृतिजन्यत्वेमानाभावेनकार्यमात्रस्यकृतिजन्यत्वप्रवादोव्याहन्येतनिचेत्। नातइत्राप्र
निर्युक्तिकत्वेनाश्रद्धेयत्वात्॥ यदाजन्यमात्रेध्वंससाधारणमेवपक्षतावच्छेदकं। कृतिजन्यत्वमात्रंसाध्यं॥ एवंचहेतावपिसत्वेविशिष्य नोपादेयं॥ प्रयोजनी
एवंचध्वंसेपिईश्वरीयकृतिजन्यत्वस्यनिराबाधतयाकार्यमात्रेकृतिजन्यत्वप्रवादोपुपपद्यते॥ नचकृतिजन्यत्वमात्रस्यसाध्यत्वेअदृष्टद्वार
दिगोचरास्मदीयकृतिजन्यत्वमादायसिद्धसाधनमितिवाच्यं॥ अदृष्टद्वारकत्वेनकृतिजन्यतायाः विशेषणीयत्वादितिदिक्॥ एताइत्राज्ञा
धवज्ञानसहकारेणज्ञानेच्छाकृतिषुनित्यत्वंचैकत्वंभासतेतिनित्यैकत्वसिद्धिः॥ अथईश्वरज्ञानादौकेइत्थंमेकत्वंअनुमित्याविषयी
नानात्वसंख्यारूपमेकत्वंतद्विषयइतिवाच्यं॥ इहत्वैकत्वस्यनित्यज्ञानानुमितेप्रागनुपस्थितत्वेनतादृशानुमितौभानासंभवादितिचेत्तत्रापि
सामानाधिकरण्यसंबंधोनेवज्ञानादावाश्रयगतमेकत्वमनुमितौभासते॥ यद्वा॥ द्वित्वसमानाधिकरणत्वरूपमेकत्वंतद्विषयः॥ नचजीवेश्व
द्वित्वसामानाधिकरण्यस्येश्वरज्ञानादौसत्वाद्बाधइतिवाच्यं॥ दुःखवदृच्छित्वेनद्वित्वस्यविशेषणीयत्वात्॥ नचेवमपिघटेश्वरगतद्वित्व
नाधिकरण्यस्यतत्रसत्वाद्बाधइतिवाच्यं॥ आसामानाधिकरण्यंभिन्नत्वेनापिद्वित्वस्यविशेषणीयत्वादित्याहुः॥ तन्न॥ ईश्वरेज्ञानइच्छायांकृतौचेत्थं
इत्थंकत्वभानेनिर्वाहेणेत्थासिद्धेः॥ वस्तुतस्तुस्वाधिकरणावृत्तिस्वभिन्नज्ञानजनकत्वमेवएकत्वं॥ एवंईश्वरेच्छाकृत्योरपिद्रष्टव्यं
एवंचतादृशज्ञानादिसिद्धौतत्रगुणत्वेनहेतुनाद्वयं॥ श्रुतत्वेसाधनीयद्वयोत्तरस्यबाधादीश्वरसिद्धिरितिद्रष्टव्यं॥ अप्रयोजकत्वन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुकूलतर्काभावादितिभावः॥ इदमुपलक्षणं॥ शरीराजन्यत्वेहेतौ शरीरस्वरूपविशेषणस्यसिद्धिसाधकस्यापिव्यभिचारसाधकत्वेनव्यर्थतया तद्हेतो
वच्छेदेनव्याप्तिग्रहासंभवेनव्याप्त्वासिद्धेश्चेत्यपिद्रष्टव्यं॥ नचव्यर्थविशेषणत्वस्याधिक्यान्नियहस्थानत्वमितकूलस्यवासिद्धानप्रतिबंधकत्व
नाभावइतिवाच्यं॥ तथापिगुरुधर्मस्यानवच्छेदकतयासाध्यसं बंधितावच्छेदकरूपयातत्स्वरूपाभावेनव्याप्त्वासिद्धिवारत्वादिति॥ तदुक्तंभाच
र्यैः सिद्धिंपरिहरतोद्वितीयापत्तेरिति॥ कृतकत्वंकार्यत्वेनकार्यकारणाभावइति॥ नचान्वयव्यतिरेकाभ्यांघटत्वावच्छिन्नंप्रतितुलोलादिक
दिनेवहेतुत्वादत्राकार्यकारणाभावेमानाभावइतिवाच्यं॥ घटत्वघटत्वादिभेदेनतत्तत्कार्यकारणभावकल्पनापेक्षयाकार्यत्वावच्छिन्नंप्रतिस
नहेतुत्वकल्पनस्यैवोचितत्वात्॥ यद्वित्रोषरीयोरितिन्यायेनकार्यत्वकृतिभ्यांसामान्यकार्यकारणभावस्यावश्यकत्वात्॥ नचतादृशन्यायो
मानादितिवाच्यं॥ कार्यत्वावच्छिन्नाभावेतत्तत्सभावकूटस्यप्रयोजकत्वकल्पनेगौरवात्॥ तत्तित्वावच्छिन्नाभावस्यैकस्यप्रयोजकत्वे
वादिति॥ केचित्तु॥ मास्तुकार्यत्वंहेतोःकार्यतावच्छेदकतयापिघटत्वाद्यवच्छिन्नंप्रतिहेतोःकारणतयासंभवकालीनघटादिक
त्यघटत्वादिहेतुनासकृत्कृतसाधनजीगांवधादीश्वरसिद्धिरितिभाहुः॥ द्वीपितिकृतस्तुकार्यत्वावच्छिन्नंप्रतिहेतु
वेपिघटत्वावच्छिन्नंप्रतिहेतोर्हेतुतयाखंडघटोपनेःपूर्वंसे [illegible] यकार्यतादशायलेनईश्वरसिद्धिमाहुः॥ नन्वेवंरीत्यायदिघ
कुलालादिवेश्योरन्वयव्यतिरेकाभ्यांकार्यत्वावच्छिन्नंप्रतिचेष्टादिनाहेतुत्वंकुतोधुक्तेः॥ एवंचेष्टान्योधने
नित्यशरीरमधिसिद्धेरितिचेन्न॥ तादृशान्वयव्यतिरेकाभ्यांकार्यत्वावच्छिन्नंप्रतिक्रियात्वेनहेतुत्वेतत्रचेष्टात्वेनहेतुत्वेमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावविशिष्टाभावत्वेनैवहेतुत्वेऽन्योन्याश्रयेण ध्वंसस्यहेतुता...संसर्गाला घवात्तूहेतुतास्तु अतआह॥ प्रतिबंधकसंसर्गेति॥ प्रतिबंधकसत्वेपिसंबंधांतरवच्छिन्न
सत्वात्कार्योपनिवारणायतत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैवहेतुत्वस्यवाच्यत्वेनध्वंसस्यहेतुता॥ तस्यसंसर्गावच्छिन्नत्वेमानाभावादितिभावः॥ दुरित
दुरितध्वंससामग्रीप्रयुक्तः॥ स्वतःसिध्योदुरितकारणाभावप्रयुक्तः॥ एतेनविघ्नध्वंसस्यतदर्थताभावस्यवासमाप्तिहेतुताविचारस्याप्रकृततयात्यवस्थानेप्रकृताल
एवंप्रतिबंधकाभावकूटस्यहेतुत्वेप्रागभावध्वंसयोर्युगपदवस्थानासंभवेनकार्यकूट्याप्रसिद्धिः॥ पूर्वोक्तरीत्यातत्संसर्गावच्छिन्नप्रतियोगिकत्वस्यप्रतिबंधकाभा
षणत्वेनध्वंसप्रागभावयोरसंग्रहश्चेतिदूषणानिनिरस्तानि॥ उक्तरीत्याप्रतिबंधकाभावस्यैवकार्यमात्रेहेतुत्वादितिपंसंसारेति॥ संसारस्यमहीरुहः
सुरक्षेत्रमित्यावर्तनेकमिधारयमाह॥ मुक्तावप्यसंसारएवेति॥ बीजत्वंसमवायीकारणत्वंतच्चेश्वरेवास्तिनमतआह॥ नित्येतिति॥ नन्वीश्वरनमस्कारस्यमंगलो
मयुक्तोश्वरमानाभावात्॥ नहितत्रप्रत्यक्षंप्रमाणं॥ अरूपिद्रव्यत्वेनबाह्यप्रत्यक्षाविषयत्वात्॥ नापिमानसं॥ परस्यमनःपरेणमनसाप्रत्यक्षकारणायास्मप्रत्यक्षे
तियतात्मद्यावर्त्तविजातीयमनःसंयोगत्वेनहेतुत्वस्यावश्यंवाच्यतयाईश्वरेतस्याभावात्॥ नचशास्त्रमीश्वरेजनयन्तिस्यादिश्रुतिरेवप्रमाणं॥ श्रुतीनांईश्वरेचरितत्वे
माण्यादीश्वरसंदेहश्रुतिप्रामाण्यस्यापिसंदिग्धत्वादतआह॥ एतेनेति॥ प्रमाणंअनुसंधेयंप्रमाणं॥ तथाक्षित्यंकुरादिकमपि॥ नन्वत्रकिंपक्षतावच्छेदकं॥ ना
तित्वं॥ अंकुरादेरपिक्षितित्वेनपृथक्तदुपादानवैयर्थ्यात्॥ किंचक्षितित्वंसामान्याधिकरण्येनसाध्यसिद्धिरूहत्रयत्वेदृष्टांतेघटादौअंत्रातःसिद्धसाध्य
वच्छेदकावच्छेदेनतथात्वेपरमाणौबाधः॥ जन्यक्षितित्वस्यपक्षतावच्छेदकत्वेपरमतेजन्यपदव्यावर्त्यप्रसिद्धिरस्मन्मतेक्षितेरभावात्॥ ज
त्वस्यैवतथात्वसंभवेनपक्षतावच्छेदकौटौक्षितित्वस्यव्यर्थत्वाच्च॥ नचतदपिसंभवतिपक्षतावच्छेदकहेतोरेक्यप्रसंगादितिचेत्न॥ स्वरूपसंबंधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यैवकार्यस्यैवपक्षतावच्छेदकत्वात्॥प्रागभावत्वेप्रतियोगिरूपकार्यत्वस्यैवहेतुतेनैवतयोरैक्याभावात्॥साध्यंचनस्वोपादानगो
चरज्ञानचिकीर्षीकृतिजन्यत्वंकार्यमात्रप्रतिकृतेरन्वयव्यतिरेकाभ्यांहेतुत्वेनतज्जनकज्ञानचिकीर्षयोस्तत्रान्यथासि
द्धेनतत्रीयजन्यत्वरूपसाध्यस्यतत्रबाधात्॥दृष्टान्तपक्षसाधारण्यायस्यत्वस्याभावेनतत्स्वोपादानगोचरत्वा
द्यस्यासंभवात्कृतिस्वापेक्षयोपादानगोचरयुकृतित्वस्यगोरवेणकार्यजनकतानवच्छेदकत्वाच्च॥किंतुवित्रोष्यतासंबंधावच्छि
न्नकृतिजन्यत्वंकार्यत्वंतेनादृष्टद्वारास्मदीयकृतिजन्यत्वस्यपक्षसत्वेपिनासिद्धिसाधनं॥य
त्कार्यमात्रेकृतित्वेनवान्वयव्यतिरेकाभ्यांज्ञानत्वेनेच्छात्वेनहेतुत्वंस्वीक्रियतेतदातादृशीनजन्यत्वंकृतिजन्यत्व
साध्यमस्तु॥यत्तुकर्तृजन्यत्वमेवसाध्यमिति॥तन्न॥कार्यमात्रेकर्तृत्वेनजनकत्वेमानाभावाल्लाघवात्कृतित्वेनैव
हेतुत्वात्॥ननुकार्यं॥वित्रोष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितजन्यत्वाप्रसिद्ध्यासिद्धिरित्याशं
क्याह॥तत्रध्वंसेपक्षतावच्छेदकजन्यत्वंकोतेवित्रोष्यतासंबंधावच्छिन्नजनकतानिरूपितसमवायसंबंधा
जन्यत्वस्यसाध्यस्याभावाद्बाधइतिचेत्॥नासत्वेवित्रोष्यजन्यत्वस्यैवध्वंसयावत्स्यपक्षतावच्छेदकत्वोपगमा
नहेत्वनाधिकरणध्वंसेऽपिसाध्याभावेनव्याप्तिग्रहइतिवाच्यं॥सत्वेवात्रोष्यस्यैवहेतोरित्रोषणात्॥अथ

आचार्यानुयायिनस्तु ॥ अस्तु चेष्टतेन तत्रहेतुत्वं अस्तु चतदनुरोधेनेश्वरस्य नित्यशरीरत्वं तथापि नेश्वरस्यातिरिक्तशरीरसिद्धिः ॥ पर
मेवतल्लक्षणोपपत्तेः ॥ एवं चेश्वरकृतिजन्यचेष्टोवद्भिः परमाणुभिरेवतत्कार्योणामुत्पत्तिः ॥ परमाणुक्रियायांचेष्टालक्षणेवेजात्यांगी
रीरलक्षणेत्यावाच्यत्वेस्यानिवेत्राश्च नपरमाणूनांशरीरत्वाद्नुपपत्तिः ॥ नच नानापरमाणूनांशरीरत्वकल्पनेगौरवाद्युक्तं
रिक्तशरीरसिद्धिरितिवाच्यं ॥ तस्यशरीरस्यमहतेरभावस्यतस्यपालणादेरप्रवेशासंभवेनयोगाणांतदर्थिनेकशरीरोत्पादकल्पनानु
अपपत्तेरहस्यकार्यत्वादकल्पनानुपपत्तेरित्याहुः ॥ इत्यलंपल्लवैरिति ॥ यत्तु पूर्वोक्तस्यापनानुमानेशरीरजन्यत्वमुपाधिः ॥ त
दोसाध्यव्यापकत्वात् ॥ अंकुरादोसाध्यनाव्यापकत्वाच्च ॥ नचांकुरादोसकर्तृकत्वरूपसाध्यसंदेहेनोपाधेः साध्यव्यापकत्वसंशया
धित्वनिश्चयइतिवाच्यं ॥ तथापिसंदिग्धोपाधित्वस्यदुर्वारत्वात् ॥ नचेदृशोपाधिसंदेहोपक्षीयव्यभिचारसंदेहएवसच्चनप्रतिबंध
पक्षतत्समयोर्व्यभिचारसंशयस्यापिप्रतिबंधकत्वात् ॥ अतएवानुकूलतर्कविरहदशायांसंदिग्धोपाधित्वमिधानेग्रंथकृतांसंगच्छतेयि
कार्यत्वेनसतिसेनकार्यकारणभावस्यस्यानुकूलतर्कस्यसत्वेनकार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेनसाध्यव्यापकत्वेनो
साध्याव्यापकतानिश्चयादिति ॥ एवंचोक्तानुमानेनईश्वरसिद्धौतदुक्तंतेनवेदस्यप्रामाण्यनिश्चयाद्वेदोपिईश्वरप्रमाणमाद्या
भ्रमिइति ॥ इत्यादिकंयेत्यादिनाईश्वरमुपसंहरतियःसर्वज्ञःसर्वात्मरूपस्यज्ञानमयंतपःसोकामयतेत्यादीनांपरिग्रहः ॥ कार्यपक्षकान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चोपलक्षणं॥ सर्गाद्यकालीनद्व्यणुकप्रयोजकैकर्मप्रयत्नजन्यं कर्मत्वात्॥ गुरुत्ववतांपतनाभावेऽपतनप्रतिबंधकप्रयत्नप्रयुक्तऽपतित्वात्॥ ब्रह्मा उ
प्रयत्नजन्यः नात्मत्वात्॥ घटादिव्यवहारः स्वतंत्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकैकल्पितलिप्यादिव्यवहारवत्॥ वेदजन्यप्रमावत्कृ
वाक्यार्थज्ञानजन्यत्वात्॥ वेदः असंसारिपुरुषप्रणीतः वेदत्वात्॥ वेदः पौरुषेयः वाक्यत्वात्॥ द्व्यणुकपरिमाणजनिकासंख्या भी
स्थिजन्यावयवान्यसंख्यात्वात्॥ इत्यनुमानेतरापि साक्षात्परंपरयेश्वरसाधकानिकोट्यानीति॥ तदुक्तं॥ कार्ययोजनधृत्यादेः प
मितःश्रुतेः॥ वाक्यात्संख्याविवृद्धेश्च साध्यो विश्वविदव्ययेति॥ अयोजनं कर्मापगतेर्गम्यतेनेनेतिपदव्यवहारइतिसंक्षेपः॥ ८॥ ए
व्यावर्तनायप्रतिजानीते॥ द्रव्यगुणेत्यादि॥ निरूप्यतेनिरोधः॥ संयोगापेक्षया कर्मणोतिरिक्तत्वं नास्तीतिभाष्यमतेनिरासार्थं तथेत्युक्तं॥
णः एवंरूपदार्थः तथाकर्मापीत्यर्थः॥ अभावोधिकरणात्मकइवेतिप्राभाकरमतंदूषयितुंपुनस्तथेत्युक्तं॥ युक्तिश्चाग्रेवक्ष्यते॥ यद्यपिविभा
न्यूनाधिकसंख्याव्यवच्छेदकतयोरवस्त्वसंख्यात्वेन्या। तथापिसत्यग्रहणंस्पष्टार्थं॥ ननुपदार्थः कुतोनोक्तइत्यतआह॥ कीर्तितः
तथाचैतेभ्योन्यपदार्थः नसंत्येव॥ करणादिप्रश्नानिरुक्तत्वादितिभावः॥ नन्वितरेषुद्रव्येषुषट्भावपदार्थः इतरस्वभावइतिनि
पेक्षत्वंकुतोननिरूपितामित्याकांक्ष्याह॥ मुक्तावलयासत्समवेतीति॥ अत्रसमवायेकार्यसमवायान्यतरसंबंधेनसत्तावत्त्वंतद
भावत्वंप्रसंगात्॥ अर्थादापन्नंतेनप्रकृतेनैवग्रंथेनोपन्यस्यतइति॥ भावत्वेनोपन्यासेत्यर्थः॥ तेषामितिनिरोधः॥ ननुन्यूनपदार्थः वृथानसंभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यग्रंथेषोडशापदार्थनिरूपणादित्यत्रोक्तनैयायिकानामपिमतेसप्तपदार्थाइत्यविरुद्धंषोडशापदार्थैर्निःश्रेयसावाप्तइत्याह॥एतेचे
र्थभाष्यसंमतिमाह॥प्रतिपादितंचेति॥एवमेवेति॥द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाःसप्तैवपदार्थाः॥षोडशानीअत्रेवां
तिप्रतिपादितार्थः॥कथमेतन्नोवेद्यतीत्येतदाशंक्याह॥प्रमाणस्येंद्रियादेर्द्रव्यादिज्ञानादेर्गुणप्रमेयस्यात्मशरीरेंद्रियस्वरूपस्यद्र
स्यगंधरसरूपस्पर्शशब्दस्वरूपस्यगुणबुद्धिमनसोद्रव्यप्रवर्तनागुणदोषाणांइच्छाद्वेषमिथ्याज्ञानस्वरूपाणांरागद्वेषमोहपद
नांगुणेप्रेत्यभावोजननमितिपुनरुत्पत्तिमरणोत्तरजन्मत्वंमरणभावपदप्रवृत्तिनिमित्तं॥चरमःप्राणशरीरसंयोगध्वंसोमरण
द्यःशरीरप्राणसंयोगजन्यं॥तथाचमरणोत्तरतद्दशासंयोगरूपस्यनगुणे॥सुःखदुःखसंवेदनरूपस्यमुख्यफलस्यगुणोगौणो
साधारणजन्यमात्रस्वरूपफलस्यापिद्रव्यादिषुपीडालक्षणस्यदुःखस्यगुणेतथोक्तः॥अपवर्गस्तुआत्यंतिकोदुःखनिवृत्तिः॥सु
निशरीरेषडिंद्रियाणिषड्विषयाःषड्बुद्धयःसुखंदुःखंचेतिएकविंशतिः॥तत्रदुःखसजातिश्चन्येशरीरादौदुःखसंबं
गौणंदुःखत्वं॥स्वर्गादिसुखेस्यापितन्नात्राज्ञानेनदुःखसंबंधित्वमयाहतमेव॥नचैकविंशतिदुःखांतर्गतयोर्मनःशरीरयो
त्यक्त्वातत्रैवांतर्भावइतिवाच्यं॥यद्रूपविशिष्टस्यश्रवणद्वारादुःखहेतुतयादुःखत्वंतद्रूपस्यनगौणत्वात्कुत्रापिनात्मनोविशिष्ट
णेंद्रियरूपदुःखनात्वात्॥एवमात्मसंयोगरूपव्यापारविशिष्टस्यमनसोज्ञानेद्वारादुःखस्वरूपतयाव्यापारनात्व

दिनकरि०

९

त्रीष्टमनोस्तु दुःखनाशसंभवादिति॥ दुःखनिवृत्तावपि कीदृक्त्वं चेत्स्वसमानाधिकरणदुःखासमानकालीनत्वं॥ नन्वेवं
दुःखध्वंसस्य मुक्तिरूपत्वे कथं तत्त्वज्ञानसाध्यतास्येति चेत्। इत्थं॥ तत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः॥ वासनानाशे च दोषस्य वा
वीतरागादेरभावः॥ वितृष्णाभावे वीतरागाभावो॥ तदनुत्पादप्रारब्धकर्मक्षीणदेहान्यदेहसंबंधरूपजन्माभावः॥ तथा
स्वसमानाधिकरणदुःखासमानकालीनत्वस्य वितृष्णात्वे तत्त्वज्ञानस्य प्रयोजकत्वान्मुक्तेस्तत्त्वज्ञानसाध्यत्वं॥ तथा
त्वं॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनंतरापायात् अपवर्ग इति॥ अस्यार्थः॥ षष्ठितेषु जन्मादिषु
उत्तरोत्तरापायमपाये तदनंतरापायात् अव्यवहितपूर्वाभावात्॥ तथा चतज्ज्ञानेन मिथ्याज्ञाननाशः॥ तेन दोषाणां नाशः॥ तेन प्र
नुत्पादः॥ तेन जन्मानुत्पादेन दुःखानुत्पाद इति पूर्वोक्तवाक्यार्थः पर्यवसितः॥ एवं विनाशादिदुःखनाशस्य स्वरूपा
न तत्र तत्त्वज्ञानस्य प्रयोजकतेति वदंति॥ नव्यास्तु योग्यात्मविशेषगुणनाशप्रति स्वोत्तरत्वं तिगुणानां कार्यत्वात् स्वो
गुणो नैवदुःखध्वंसरूपमुक्तिसंभवेन तत्रतत्त्वज्ञानापेक्षेति दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयं॥ दुः
स्यचरमयोग्यगुणत्वाभावात् न स्वोत्तरवर्तिगुणनाशरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः॥ त
दनापवर्गस्वभावसंचितस्य गुणे साध्यतेयादृच्छाविषयरूपस्य प्रयोजनस्य यथायथं दृष्टादिषु तत्तद्

CC-0. In Public Domain.Kavikulguru Kalidas.Sanskrit University Ramtek Collection

स्वार्थैकदेशस्य सिद्धांतस्य दृष्टांतादिषु त्रैरूप्यस्य रूपस्य प्रतिज्ञासंन्यासस्य प्रतिज्ञाहेत्वोर्नियमस्य प्रतिज्ञाहेतुदृष्टांतानां अवयवानां गुणो व्याप्तिसाधनव्यापकत्व
स्य गुणो निर्णयस्य गुणो तत्त्वबुभुत्सोः कथास्वरूपस्य वादस्य गुणो विजिगीषुकथास्वरूपस्य जल्पस्य गुणो स्वपक्षस्थापना हे
त्वपदेशो गुणो अनुमितिकरणज्ञानान्यतरप्रतिबंधकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं दृष्टांतादिषु
प्रामाण्येन प्रयुक्तस्य त्रैरूप्यस्य अर्थांतरवादिकल्पदूषणाभिधानरूपस्य छलस्य गुणो असदुत्तररूपजातिषु
जयहेतुस्वरूपनिग्रहस्थानानां यथायथं दृष्टांतादिषु तत्त्वोप०॥ निग्रहस्थानानि॥ प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्य
सेतरमर्थांतरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपो मतानुज्ञापर्यनु
ज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतो हेत्वाभासाश्च॥ अत्रचकारोऽनुक्तसमुच्चयार्थः॥ तेन दृष्टांतसाधनवैकल्यादीनां परि
तत्त्वविनिश्चयप्रतिज्ञातस्यपक्षादेः परित्यागरूपप्रतिज्ञाहानिस्वीकरणरूपो दोषो हि धीषयापूर्वोक्तनुक्तविशेषणाविनिश्चितया प्रतीतो
नरूपस्य प्रतिज्ञांतरस्यगुणोस्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्यगुणो॥ स्वोक्तसाध्यादिनिह्नवरूपो
क्तेतरसाध्यापलापरूपप्रतिज्ञासंन्यासस्यगुणो॥ परोक्तहेत्वपो हि धीषयापूर्वोक्तहेतुनावच्छेदकातिरिक्तहेतुनावच्छेदकवि
शेषनरूपहेत्वंतरस्यगुणो॥ प्रस्तुतानाकांक्षितार्थाभिधानरूपोर्थांतरस्यगुणो॥ अवाचकपदप्रयोगरूपनिरर्थकस्यगुणो॥ परिषन्मतिकौशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगरूपाविज्ञातार्थस्यगुणे॥अभिमतवाक्यबोधानुकूलार्थाकांक्षा
न्यूनपदरूपस्यापार्थस्यगुणे।समयसंबंधविषयीभूतकथा।क्रमविपरीतक्रमेणा।भिधानरूपस्याप्रस्तावकालस्थगुणे॥यत्किंचिदव
यूनावयवाभिधानरूपस्यन्यूनस्यगुणे॥अविवक्षितभिधानरूपस्याधिक्यस्यगुणे॥पुनरभिधानस्यपुनरुक्तस्यगुणे॥पा
त्रिरात्रिहितस्याप्रस्तुतोच्चारणरूपस्यानुभाषणस्याभावे॥परिषदाविज्ञाताथंस्यवादिनात्रिरात्रिहितस्याप्यविज्ञानरूपस्याज्ञानस्
उत्तरार्थापरिज्ञानेबुध्यापिउत्तरस्याप्रतिपत्तिरूपायाःअप्रतिभायाअभावे॥असम्भवतीलांतरकक्रमेणासंगतशब्दार्थकथाविच्छेदरूपा
क्षेपस्याभावे॥स्वपक्षेदोषमनुद्धृत्यपरपक्षेदोषाभिधानरूपमतानुज्ञायागुणे॥निग्रहस्थानंप्रस्तुतोनिग्रहस्थानानुज्ञावन
पर्यनुयाज्योपेक्षणस्यापाभावेनिग्रहस्थानानवसरेता।निग्रहस्थानाभिधानरूपस्यानियोज्यानुयोगस्यगुणे॥कथायं
तासिद्धांतप्रत्यक्षप्रत्यक्षरूपस्यापसिद्धांतस्याभावे॥हेत्वाभासानांपक्षवैकल्यलक्षणानाइत्यादिग्रंथभावइति॥छ॥मत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.01.20 13:56
,TRANSFERRED=2020/01/18 at 14:00:24
,PAGES=18
,TYPE=STD
,NAME=S0002565
,Book Name=M-2429-SHRIDINKARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection